# ॥ ગજાનનસ્તોત્ર ॥

.. gajAnana stotra ..

sanskritdocuments.org

August 20, 2017

# .. gajAnana stotra ..

# ॥ ગજાનનસ્તોત્ર ॥

## Sanskrit Document Information

Text title : gajAnana stotra from Mudgala Purana

File name : gajAnanastotrammudgala.itx

Category : ganesha, stotra

Location : doc_ganesha

Author : Traditional

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : mudgalapurANa_dvitIyakhaNDa

Latest update : September 02, 2004

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ ગજાનનસ્તોત્ર ॥

મુદ્ગલપુરાણાન્તર્ગતમ્

શ્રીગણેશાય નમઃ ।
દેવર્ષય ઊચુઃ ।
નમસ્તે ગજવક્ત્રાય ગજાનનસુરૂપિણે ।
પરાશરસુતાયૈવ વત્સલાસૂનવે નમઃ ॥ ૧॥

વ્યાસભ્રાત્રે શુકસ્યૈવ પિતૃવ્યાય નમો નમઃ ।
અનાદિગણનાથાય સ્વાનન્દાવાસિને નમઃ ॥ ૨॥

રજસા સૃષ્ટિકર્ત્રે તે સત્ત્વતઃ પાલકાય વૈ ।
તમસા સર્વસંહર્ત્રે ગણેશાય નમો નમઃ ॥ ૩॥

સુકૃતેઃ પુરુષસ્યાપિ રૂપિણે પરમાત્મને ।
બોધાકારાય વૈ તુભ્યં કેવલાય નમો નમઃ ।૪॥

સ્વસંવેદ્યાય દેવાય યોગાય ગણપાય ચ ।
શાન્તિરૂપાય તુભ્યં વૈ નમસ્તે બ્રહ્મનાયક ॥ ૫॥

વિનાયકાય વીરાય ગજદૈત્યસ્ય શત્રવે ।
મુનિમાનસનિષ્ઠાય મુનીનાં પાલકાય ચ ॥ ૬॥

દેવરક્ષકરાયૈવ વિઘ્નેશાય નમો નમઃ ।
વક્રતુણ્ડાય ધીરાય ચૈકદન્તાય તે નમઃ ॥ ૭॥

ત્વયાઽયં નિહતો દૈત્યો ગજનામા મહાબલઃ ।
બ્રહ્માણ્ડે મૃત્યુ સંહીનો મહાશ્ચર્યં કૃતં વિભો! ॥ ૮॥

હતે દૈત્યેઽધુના કૃત્સ્નં જગત્સન્તોષમેષ્યતિ ।
સ્વાહા-સ્વધા યુતં પૂર્ણં સ્વધર્મસ્થં ભવિષ્યતિ ॥ ૯॥

એવમુક્ત્વા ગણાધીશ સર્વે દેવર્ષયસ્તતઃ ।
પ્રણમ્ય તૂષ્ણીભાવં તે સમ્પ્રાપ્તા વિગતજ્વરાઃ ॥ ૧૦॥

કર્ણૌ સમ્પીડ્ય ગણપ-ચરણે શિરસો ધ્વનિઃ ।
મધુરઃ પ્રકૃતસ્તૈસ્તુ તેન તુષ્ટો ગજાનનઃ ॥ ૧૧॥

તાનુવાચ મદીયા યે ભક્તાઃ પરમભાવિતાઃ ।

તૈશ્ચ નિત્યં પ્રકર્તવ્યં ભવદ્ભિર્નમનં યથા ॥ ૧૨॥

તેભ્યોઽહં પ્રરમપ્રીતો દાસ્યામિ મનસીપ્સિતામ્ ।
એતાદૃશં પ્રિયં મે ચ મનનં નાઽત્ર સંશયઃ ॥ ૧૩॥

એવમુક્ત્વા સ તાન્ સર્વાન્ સિદ્ધિ-બુદ્ધ્યાદિ-સંયુતઃ ।
અન્તર્દધે તતો દેવા મનુયઃ સ્વસ્થલં યયુઃ ॥ ૧૪॥

॥ ઇતિ શ્રીમદાન્ત્યે મૌદ્ગલે દ્વિતીયખણ્ડે ગજાસુરવધે ગજાનનસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

.. gajAnana stotra ..
Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*